दिनाङ्क 29-4-21 शास्त्री तृतीय खण्ड, विषय - व्याकरण
ग्रन्थ- परमलघुमञ्जूषा

प्रश्न- मीमांसकाभिमतं लक्षणास्वरूपं प्रतिपाद्य लक्षितलक्षणायाः स्वरूपं प्रतिपाद्यताम्।

उत्तर- शक्यसम्बन्धो लक्षणेति स्वीकारे वाक्ये लक्षणा न संभवति, नैयायिकमते तत्र शक्तेरभावात्। मीमांसकाभिमतां लक्षणास्वरूपम् यथा- स्वं वाच्यादि तेन बोध्यो योऽर्थस्तत्सम्बन्धो लक्षणा, वाक्यार्थरूप वाच्य बोध्यो भवति अतः वाक्येऽपि लक्षणा सिध्यति। गम्भीरायां नद्यां घोषः इत्यत्र सप्तम्यन्त पदार्थयोः अभेदान्वयः। तत्र यदि गम्भीरपदं तीरस्य लक्षकं स्वीक्रियते तदा तीराभिन्ना नदीति बोधापत्तिः सा च न संगच्छते, तीरनद्योः भेदस्य वास्तवात्। नहि तीरं नदी। अत एव न नदीपदेऽपि। गम्भीरपदार्थान्वयात् नहि तीरं गम्भीरम्। न च प्रत्येकं पदद्वये सा, विशिष्टनदी बोधानापत्तेः। नदीपदे लक्षणा स्वीकारे गम्भीराभिन्नं तीरमिति बोधापत्तेः। सा च असङ्गता, गाम्भीर्यस्य नदीधर्मता तीरे बाधात्। अत एवानन्वयापत्तिः। पदद्वयेऽपि लक्षणाऽस्तु - गम्भीरपदस्य गम्भीरतीरे नदीपदस्य नदीतीरे एवं च गम्भीराभिन्न नदीतीरे घोष इति बोधः स्यात्। पदद्वये सति विशिष्टबोधानापत्तेः। अर्थात् अत्र पक्षे गम्भीराभिन्ना या नदी तत्तीरे घोषः इति बोधो न स्यात्। नामार्थयोरभेदान्वय एवेति नियमेन गम्भीरतीराभिन्नं यन्नदीतीरं तत्र घोष इत्येव बोधः स्यात्। न च नदीपदेन गम्भीरनदीतीरं लक्ष्यते, गम्भीरपदं तात्पर्यग्राहकमिति वाच्यम्। विनिगमनाविरहात्, कस्य लक्षकत्वं कस्य तात्पर्यग्राहकत्वमिति वक्तुमशक्यत्वाच्च। तस्मात् समुदायबोध्य गम्भीरत्वविशिष्ट नदीपदार्थः तत्सम्बन्धो लक्षणा।

नैयायिकाभिमतं लक्षितलक्षणास्वरूपम् —
द्विरेफपदस्य स्वलक्ष्य भ्रमरशब्दवाच्यार्थे लक्षणाया लक्षितलक्षणेति व्यवहारः। स्वबोध्य पदवाच्यत्व सम्बन्धः।

उपशास्त्री द्वितीय वर्ष - विषय - व्याकरण

दिनाङ्क 29-4-21 ग्रन्थ सिद्धान्त कौमुदी (स्वादिगणः)

१- सुनोति – षुञ् धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। धात्वादेः षः सः इति सूत्रेण सत्वे। तिङ्शित् सार्वधातुकम् इति सूत्रेण सार्वधातुक संज्ञायाम् शपं प्रबाध्य स्वादिभ्यः श्नुः इति सूत्रेण श्नु प्रत्यये अनुबन्ध लोपे। सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे सुनोति इति सिद्धम्।

२- सुन्वन्ति – षुञ् धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण झि प्रत्यये। झोऽन्तः इति सूत्रेण झकारस्य स्थाने अन्तादेशे। सार्वधातुक संज्ञायाम्। शपं प्रबाध्य स्वादिभ्यः श्नुः इति सूत्रेण श्नु प्रत्यये अनुबन्धलोपे। धात्वादेः षः सः इति सूत्रेण सत्वे। ङित्वात् अचिश्नु धातुभ्रुवां ... इति सूत्रेण उवङादेशे प्राप्ते तं प्रबाध्य हुश्नुवोः सार्वधातुके इति सूत्रेण यणे कृते सुन्वन्ति इति सिद्धम्।

३ सुनुते – षुञ् धातोर्लट्, तिप्तस्झि इति सूत्रेण तङ्त्वात् त प्रत्यये। सार्वधातुक संज्ञायाम् शपं प्रबाध्य स्वादिभ्यः श्नुः इति सूत्रेण श्नु प्रत्यये अनुबन्ध लोपे। धात्वादेः षः सः इति सूत्रेण सत्वे। सार्वधातुकत्वात् गुणे प्राप्ते। अपित् सार्वधातुकं ङिद्वत् इति नियमात् गुणनिषेधे। टित आत्मनेपदानां टेरे इति एत्वे सुनुते इति सिद्धम्।

४- सुषाव – षुञ् धातोर्लिट् लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये। धात्वादेः षः सः इति सत्वे। परस्मैपदानां णलतुस्... इति तिप्स्थाने णलादेशे, अनुबन्ध लोपे। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यास संज्ञायाम्, हलादिशेषे वृद्धौ आवादेशे। आदेशप्रत्यययोः इति सूत्रेण षत्वे कृते सुषाव इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा०उ०सं०म०वि० [illegible]
पूर्णिया

अर्थात् द्विरेफपद घटकस्य रेफद्वय विशिष्टे
भ्रमरपदे लक्षणा। लक्षितं च भ्रमरपदं लक्षणया भ्रम
रूपमर्थं बोधयति। लक्षितस्य लक्षणेति वाच्यार्थः।
वस्तुतस्तु द्विरेफ पदं रूढि शक्त्यैव भ्रमर बोधकं
अतः अवयवार्थस्य प्रतीतिस्तु तयैव न भवति यथा
रथान्तरादा। अथवा- पदनिष्ठ रेफद्वय स्यार्थे
आरोपात् तत् सम्बन्धित्वेनैव भ्रमर बोधः
अतएव मीमांसक भ्रमर पर्याये द्विरेफ पदस्य
पाठः बाध प्रतिसंधानं विनैव द्विरेफ पदात् भ्रमर
बोधोऽनुभूयते इति लक्षणाश्रयणं मयुक्त
मिति बोध्यम्।

अभिनाव मिश्र
एलो०प्रो० व्याकरण
२१०३१ सं० सं० वि०
स्वलिखेना पूर्णिमा